# Sauśravasa-Pāṇini-śāstrarīti-dvaya-parīkṣā

Jan E.M. Houben

▶ To cite this version:

Jan E.M. Houben. Sauśravasa-Pāṇini-śāstrarīti-dvaya-parīkṣā. Āraṇyakam (Āraṇyakamityākhyaṣāṇmāsikaśodhapattram), 2012, 19 (ūnaviṁśavarṣam) (1 (ūnaviṁśavarṣaprathamāṅkaḥ)), pp.7-14. halshs-00798698

HAL Id: halshs-00798698

https://shs.hal.science/halshs-00798698

Submitted on 10 Mar 2013

HAL is a multi-disciplinary open access archive for the deposit and dissemination of scientific research documents, whether they are published or not. The documents may come from teaching and research institutions in France or abroad, or from public or private research centers.

L'archive ouverte pluridisciplinaire HAL, est destinée au dépôt et à la diffusion de documents scientifiques de niveau recherche, publiés ou non, émanant des établissements d'enseignement et de recherche français ou étrangers, des laboratoires publics ou privés.

Distributed under a Creative Commons Attribution - NonCommercial 4.0 International License

आरण्यकमित्याख्यषाण्मासिकशोधपत्त्रे ऊनविंशवर्षप्रथमाङ्के प्रकाशितः (चैत्रः, वि.सं. २०६९ । मार्च, २०१२), पृ. ७-१४.

# सौश्रवस-पाणिनि-शास्त्ररीतिद्वय-परीक्षा

यन् हुबन् – पारिस्

*किं ज्ञान-तुल्य-पवित्रम् अत्र लभ्यते* (एकपदी प्रभावती - त भ र ज ग) //
*विद्याकारुण्यपूर्णेन्दुं गुरुजीति सुविश्रुतम् ।*
*शब्दादिशास्त्रविच्छ्रेष्ठं हृदये प्रणमाम्यहं //*
*संस्कृतभाषणे नैव क्लेशः परन्तु सूनृता ।*
*इतिसाधुवचोमार्ग - देशिकाय नमो नमः //* (टिप. 1)

1.

आधुनिकमहाग्रामरूपवसुन्धरायां पश्चिमप्राच्यलोकपरस्पराभिप्रायसंमेलनार्थं परीक्षा कर्तव्या (टिप. 2) । का परीक्षा । शास्त्ररीतिद्वयस्य परीक्षा । कस्य शास्त्ररीतिद्वयस्य । पश्चिमलोके सौश्रवस-(Eucleides)-प्रोक्तगणितशास्त्रं सुप्रसिद्धं च सुविकसितं च । प्राच्यलोके भारतमण्डले च पाणिनिप्रोक्तव्याकरणं सुप्रसिद्धं च सुविकसितं च । तयोरेव शास्त्ररीतिद्वयस्य परीक्षा कर्तव्या । तथा हि ।

यवनद्वीपे पुराणकाले साधारणयुगात् पूर्वं चतुर्थशताब्दे वर्ती (टिप. 3) ऍय्क्लेइदेस् (Eucleides) नामको महाविद्वानासीत् (टिप. 4) । स च ऍय्क्लेइदेस् पश्चिमलोकसुप्रसिद्धां गणितशास्त्रे प्रधानकृतिं स्तोय्खेय-(Stoicheia)-नामकृतिं प्रोवाच । ऍय्क्लेइदेस्-नाम्न अर्थः ऍय्क्लेऍस्-(Eu-cleees = Su-śravas)-नामकपुरुषस्यापत्यम् इति । अथवा सुश्रवस अपत्यम् इति । अथवा सौश्रवस इति । तस्य प्रधानकृतेः स्तोय्खेय-नाम्न अर्थो बीजभूतज्ञानानीति (Elements) । तत्र च प्रायेण सिद्धान्तातिदेश-(axiom and deduced theorem)-प्रकारेण क्षेत्रविद्याप्रधानं गणितशास्त्रं प्रतिपादितम् ।

भारतद्वीपे च पुराणकाले साधारणयुगात् पूर्वं चतुर्थशताब्दे वर्ती दाक्षीपुत्रः पाणिनिर् नामको महाविद्वान् आसीत् । स च पाणिनिर् भारतमण्डलसुप्रसिद्धां व्याकरणशास्त्रे प्रधानकृतिमष्टाध्यायीनामकृतिं प्रोवाच (टिप. 5)। तत्र च प्रायेण उत्सर्गापवादप्रकारेण प्रकृतिप्रत्ययरूपवाक्यस्थपदविद्याप्रधानं शब्दशास्त्रं प्रतिपादितम् ।

अथ यद्यदस्मिन् विषये मम प्रतिपादनाभिप्रेतं तत्सर्वमत्र संक्षेपत एकस्यां स्रग्धरायाम् (टिप. 6) उक्तम् ।

पाणिन्युक्तं प्रमाणं सकलभरतवर्षे पुराब्दात् प्रभृत्या ।
बालानां चैवमादौ विधिगणपरिभाषासमूहोऽवधार्यः ॥
अध्येया पश्चलोके गणितगमितसिद्धान्तराशिर्यथैव ।
वृत्तावत्यद्भुतायामवगमविधिरन्यत्र गौणोऽग्रिमो वा ॥
(स्रग्धरा - म र भ न य य य)

तथा हि ।

2.1

**पाणिन्युक्तम्** इत्यादिप्रथमपादः । तत्रेदं प्रतिपादितम् ।

**सकलभरतवर्षे** संपूर्णभारतमण्डले । आधुनिक-अफगाणिस्तान्-पाकिस्तान्-इन्दियादि-गोचरे । **पुराब्दात् प्रभृत्या** पुराणकाले च ततः प्रभृति च । चतुर्थशताब्दे साधारणयुगात् पूर्वं ततः पश्चाच् च । किञ्च । इहनिरूप्यमाणव्यवस्था पाठशालादिष्वद्यपर्यन्तमेव प्रतनोति । **पाणिन्युक्तं** पाणिनिना प्रोक्तं व्याकरणशास्त्रम् । भारतीयशब्दशास्त्रे हि दाक्षीपुत्रः पाणिनिः व्याकरणशास्त्रस्य प्रधानकृतेर् अष्टाध्याय्याः प्रोक्ता । भारतदेशे च सा कृतिः शब्दशास्त्रे च शब्दशास्त्रात् परमपि च **प्रमाण**भूता ।

2.2

**बालानाम्** इत्यादिद्वितीयपादः । तत्रेदं प्रतिपादितम् ।

भारतमण्डले च **बालानां** शिष्यानामध्ययनकाल **आदौ** पूर्वभागे पाणिनिना प्रोक्तं व्याकरणं वा ततो निष्कृष्टं सव्याख्यालघुसिद्धान्तकौमुद्यादिव्याकरणं वा ततः पाणिनिप्रोक्तव्याकरणात् प्रपञ्चितं सिद्धहेमचन्द्रादिव्याकरणं वा **विधि**-प्रतिषेधसंज्ञा-**परिभाषा**धिकारसूत्रधात्वादि-**गणादि**-**समूह**-रूपं व्याकरणम् **अवधार्य**म् प्रयत्नेन सविज्ञानमध्येयम् । किञ्च । न केवलं शिष्याध्ययनकाले व्याकरणस्य प्राधान्यं दृश्यते अपि तु शास्त्रप्रणयनकालेऽपि । तद्यथा काश्मीरशिवाद्वैतपरंपरायाम् उत्पलदेवाभिनवगुप्तादिभिः स्वसिद्धान्तस्थापनार्थं प्रायेण व्याकरणशास्त्ररीतिरेवानुषक्ता ।

संस्कृतसाहित्ये च व्याकरणस्तुतिश्लोकबाहुल्यं व्याकरणशास्त्रप्राधान्यस्य सूचना । उक्तं हि भर्तृहरिणा व्याकरणशास्त्रविषये ।

"पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते ।" (टिप. 7)

अधुनापि भारतदेशे सुविज्ञातमेवेदं सुभाषितम् ।

"यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।" इत्यादि । (टिप. 8)

कात्स्न्र्यस्यार्थं चेदमपि वक्तव्यम् । भारतमण्डले सत्यपि व्याकरणशास्त्रस्य प्राधान्ये तथापि गणितशास्त्रमपि साफल्येन विकसितम् आर्यभटादिभिः ।

2.3

**अध्येया** इत्यादितृतीयपादः । तत्रेदं प्रतिपादितम् ।

भारतमण्डले व्याकरणमध्येयम् बालानाम् **यथैव पश्चलोके** (टिप. 9) पश्चिमलोके यूरप्-अमेरिकादि-आख्यात-मण्डले **गणित**-शास्त्रमध्येयम् । आधुनिक-फ्रन्स्-जर्मणि-इङ्लन्द्-अमेरिकादि-गोचरे । अथवा । पुराणकाले च यवन-द्वीपे अथवा ग्रीस्-मध्ये ततः पश्चाच्च यूरप्-आद्याख्यातमण्डले । तत्र पूर्वकाले चाधुनिककाले चेदम् अध्यापकानामिच्छा यद् बालकैश्च बालिकाभिश्चाध्ययनकाले पूर्वभागे **गणित**-शास्त्रे **गमिता**नां सप्रमाणयुक्तिभिः संस्थापितानां **सिद्धान्तानां राशिः** भूरिता **अध्येया** प्रयत्नेन सविज्ञानमध्येतव्येति । पश्चिमलोके च ॲय्क्लेइदेस् अथवा सौश्रवसो महाविद्वान् गणितशास्त्रस्य सुप्रसिद्धां प्रधानकृतिं प्रोवाच ।

कात्स्न्र्यस्यार्थं चेदमपि वक्तव्यम् । सत्यपि गणितशास्त्रस्य प्राधान्ये पश्चिमलोकेऽपि शब्दशास्त्रं न सर्वथावधीरितम् । पुराणकाले च त्रिवियुं-नामके शास्त्रत्रये व्यवसायेनाधीयते स्म । त्रिवियुं-नामके शास्त्रत्रये च व्याकरणस्य महत्त्वपूर्णतासीत् ।

इदमपि वक्तव्यम् । भारतीयव्याकरणशास्त्रे श्रोत्रग्राह्यशब्दविषयस्य प्राधान्यं दृश्यते । गणितशास्त्रे तु चक्षुर्ग्राह्यरूपविषयस्य प्राधान्यं दृश्यते ।

यथा च भारतमण्डले शब्दशास्त्रस्तुतिबाहुल्यं तथा पश्चिममण्डलपरंपरायां गणितशास्त्रस्तुतिबाहुल्यं दृश्यते । तद्यथा । यत् पूर्वकाले षोडशशताब्दे महाविद्वान्

गलिलेयो गलिलेयि वदति स्म । तदिदानीमपि वारंवारमुपन्यस्तम् (टिप. 10) । तदिदानीं प्रथमवारं संस्कृतानुवादे श्लोकद्वयरूपे प्रोक्तम् ।

पुस्तिकासदृशं विश्वं तत्त्वविद्यात्र लेखिता ।
किंभाषायां लिपिर्न्यस्ता गणितशास्त्रभाषणे ॥
तत्त्वविद्यात्र या प्रोक्ता त्र्यस्रचक्रादिरूपणे ।
विना गणितशास्त्रेण सा नैवातिप्रसीदति ॥
(इति गलिलेयो गलिलेयि महाविदुषो भावना ।)

2.4

**वृत्ताव्** इत्यादिचतुर्थपादः । तत्रेदं प्रतिपादितम् ।

भारतीयपश्चिममण्डलयोर् योऽ**वगमस्य** शास्त्रप्रतिपादितविज्ञानस्य **विधी** रीतिर् प्रकार एकत्र मण्डले **गौणो** अप्रधानो भवति स एवा**न्यत्र** अन्यतरमण्डले **अग्रिमो** प्रधानो भवति । यश्च शास्त्रप्रतिपादितविज्ञानस्य विधी रीतिर् प्रकारस् तस्मिनेव मण्डल अग्रिमः प्रधानो भवति स एवान्यमण्डले गौणोऽप्रधानो भवति । कथमिदमुपपादितम् इत्यस्मिन् विषय ऐकमत्यं नास्त्येव । कश्चेदं ज्ञातुं शक्नोति । तथास्मद्दृष्टिं प्रति **अत्यद्भुतायां वृत्ताव्** एवायं भारतीय-पश्चिममण्डलयोः शास्त्ररीतिविशेष उपपादितः ।

3.1

भारतमण्डले व्याकरणस्य प्राधान्यं यथा पश्चिममण्डले गणितशास्त्रस्यैवेतीदमनेकवारं प्रतिपादितं विद्वद्भिः । यथा औगुस्त् विल्हेल्म् वोन् श्लेगल् (टिप. 11), सर् आर् जी भाण्डारकर् (टिप. 12), दान्येल् एच् एच् इङ्गल्स् (टिप. 13), फ्रित्स् स्ताल् (टिप. 14), रफएल तोरेल्ल (टिप. 15) । इत्यादिभिः । इदानींपर्यन्तं तु संस्कृतभाषायामिदं न कदा चित् प्रतिपादितम् इति मन्यामहे । नवीनवस्तुनवीनाभिप्रायप्रतिपादनाद् विना च संस्कृतवाण्याः संपूर्णजीवितत्वं नास्त्येव ।

3.2

अत्रेदानीमपीदं प्रष्टव्यम् । भारतीयपश्चिममण्डलयोः शास्त्ररीतिविषय आत्मभेदो वा संतोलनभेदो वा वर्तते । तथा ह्याह रुद्यर्द् किप्लिङ् । प्राची हि प्राची पश्चिमा च पश्चिमेति (टिप. 16) । अत्रास्य श्लोकस्य उपन्यासः ।

आत्मभेदस्तयोरस्ति मन्यन्ते किप्लिङादयः ।
संतोलनात्मको भेद इङ्गल्स्-स्ताल्-भ्यां तु दृश्यते ॥

4.
परमार्थतस्त्वत्र शास्त्ररीतिद्वयविषये कारिकाद्वयमिदं सर्वथोपपन्नम् इति मन्यामहे ।

"प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः ।
कियद् वा शक्यमुन्नेतुं स्वतर्कमनुधावता ॥"
"तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना ।
अनुपासितवृद्धानां विद्या नातिप्रसीदति ॥" (टिप. 17)
इति वाक्यपदीयद्वितीयकाण्डवृत्त्यन्तवर्तिकारिकाद्वयम् ।

5.
टिप्पण्यः ।

टिप. 1 । पुण्यपत्तन उपदिशतां शास्त्रिणां श्री वामनशास्त्री भागवत "गुरुजी" (1918 - 2004) इति स्मरणार्थं श्लोकद्वयमिदमस्माभी रचितम् ।

टिप. 2 । दृश्यताम् Marshall McLuhan & Bruce R. Powers, *The Global Village : Transformations in World Life and Media in the 21st Century*, Oxford : 1989, तत्र च "On the one hand there is ... Visual Space – the linear, quantitative reasoning of the Western world ; on the other hand there is Acoustic Space – the holistic, qualitative reasoning of the East ... with the advent of the global village ... these two worldviews 'are slamming into each other at the speed of light' : 'the key to peace is to understand both these systems simultaneously'."

टिप. 3 । सुबोधार्थं वाक्ये सन्धिः कदाचिदनादृतः "सा (संहिता नाम सन्धिर् ) विवक्षामपेक्षते" इति न्यायेन । तदर्थं च कदाचित् समासेऽपि सन्धिरनादृतः ।

टिप. 4 । ऍय्क्लेइदेस् (Eucleides) नामकस्य महाविदुषो जन्मसंवत्सरश्चात्ययसंवत्सरश्च सम्यक् न ज्ञायेते । तस्य जन्म तु साधारणयुगात् पूर्वं चतुर्थशताब्देऽभवद् इति बहवो मन्यन्ते । तस्य स्तोय्खेय-नामक-प्रधानकृतेः प्रथमः संस्कृतानुवादः अरब-अनुवादद्वारेण सप्तदशमशताब्दे कृतः । दृश्यताम् Wilhelm Halbfass, *India and Europe: An Essay into Philosophical Understanding*, Delhi: 1990, p. 186.

टिप. 5 । दाक्षीपुत्रस्य पाणिनेः कः काल इत्यस्मिन् विषये ऐकमत्यं न विद्यते । "रूपादाहतप्रशंसयोर्यप्" इतिसूत्रप्रमाणात् त्वष्टाध्यायी साधारणयुगात् पूर्वं चतुर्थशताब्दमध्यात् पश्चात् प्रणीता । साधारणयुगात् पूर्वं चतुर्थशताब्दमध्यात् पश्चाद् धि रूप्यनामार्हा मुद्रा लभ्यन्ते । मुद्रानाम च पुराणतरेषु ग्रन्थेषु विद्यते रूप्यनाम च नवीनतरेषु ग्रन्थेषु विद्यते । अधिकमन्यतोऽवधारणीयम् ।

दृश्यताम् O. von Hinüber, *Der Beginn der Schrift und frühe Schriftlichkeit in Indien*, Stuttgart: 1989, p. 34; H. Falk, *Schrift im Alten Indien*, Freiburg: 1993, p. 304.
पाणिनेरष्टाध्यायीनामकप्रधानकृतेः प्रथमो यूरोपीयभाषायामनुवादः ओत्तो बोह्तलिङ्क महाविदुषा जर्मणभाषायां कृतो नवदशम-शताब्दे ।

टिप. 6 । स्रग्धराया अनेकलक्षणं विद्यते । यथा ।

"पूर्वे स्युर्वेदवक्रास्तदुपरि यगणः शुद्धषट्-कं च वक्रो
रुद्रन्द्रान्तेऽथ वक्रः पुनरपि चरणानीति चत्वारि यस्याम् ।
मार्तण्डाश्वैर्मुनीन्द्रैः पुनरपि मुनिभिर्यत्र विश्रान्तिरुक्ता
छन्दःसन्दोहकल्पद्रुमकुसुमकृतस्रग्धरा स्रग्धरा सा ॥"

(वृत्तमुक्तावली श्रीकृष्णभट्टकविकलानिधिगुम्फिता, जोधपुर 1963, प. 61) ।
स्रग्धरायां च यतिभङ्गो न दोषभागिति न्यायेन यतिभङ्गोऽप्यनेकवारं दृश्यते । यथास्मिन् लक्षणे द्वितीयपादे । अस्माकं तु स्रग्धरारचने अभिप्रायसंक्षेपप्रतिपादनस्यैव प्रधानलक्ष्यत्वात् प्रथमयतिरेवादृता ।

टिप. 7 । संपूर्णा कारिका ।

"तद् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते ॥ इति भर्तृहरिर्वाक्यपदीये ॥" १.१४ ॥

टिप. 8 । "यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ॥" इति ।

एवंरूपं सुभाषितं सुविज्ञातम् । तथापि छन्दसो रुचिरत्वार्थं चोद्गीतिसमापनार्थं च चतुर्थपादः केन चित् प्रकारेण प्रपञ्चयितव्यः । यथा । सकलं शकलं मैव सकृदपि शकृत् ॥ इति मन्यामहे ॥
व्याकरणस्तुतिविषे इदमपि द्रष्टव्यम् J.A.F. Roodbergen "Praise and Blame of Grammarians, Naiyāyikas and Mīmāṁsakas," *Annals of the Bhandarkar Oriental Research Institute*, vol. LXXXVII (2006): 105-121.

टिप. 9 । प्रायेणादृष्टमपि पश्च इतिशब्दरूपं सुबोधमेव । पश्चिमवाचिनः पश्चाद् इतिशब्दरूपाद्धि सरलमपोद्धरणीयम् इदं शब्दरूपं । पश्च पश्चा च छन्दसीतिसूत्रे (5.3.33) च पाणिनिना छन्दोविषये निर्दिष्टम् ।

टिप. 10 । एवं ह्याह गलिलेयो गलिलेयि (Galileo Galileo) महाविद्वान् इतालियाभाषायाम् *Il Saggiatore* नामककृतिमध्ये (1623 ; cap. VI): "La filosofia è scritta in questo grandissimo libro che continuamente ci sta aperto innanzi a gli occhi (io dico l'universo), ma non si può intendere se prima non s'impara a intender la lingua, e conoscer i caratteri, ne' quali è scritto. Egli è scritto in lingua matematica, e i caratteri son triangoli, cerchi, ed altre figure geometriche, senza i quali mezi è impossibile a intenderne umanamente parola; senza questi è un aggirarsi vanamente per un oscuro laberinto."

टिप. 11 । एवं ह्याह ओगुस्त् विल्हेल्म् वोन् श्लेगल् (August Wilhelm von Schlegel), *Réflexions sur l'étude des langues asiatiques* नामककृतिमध्ये (Bonn-Paris : 1832, p. 31-37 ; quoted from F. Staal, *A Reader on the Sanskrit Grammarians*, Cambridge, Mass. : 1972, p. 56): "Outre la terminologie ordinaire puisée dans la langue même, et appropriée seulement à un emploi spécial, Pāṇini et ses successeurs ont imaginé un autre système de termes techniques. Ce sont des mots fictifs, des signes abrégés, qu'on peut comparer à ceux de

l'algèbre. Il faut en avoir la clé, sans quoi les Aphorismes de Pāṇini ressemblent à des énigmes plus obscures que les oracles de Bacis; de même qu'un écolier qui ne sait que les éléments de l'arithmétique, ne comprendra rien aux formules algébriques."

टिप. 12 । एवं ह्याह सर् आर् जी भाण्डारकर् (Sir R.G. Bhandarkar), *Second book of Sanskrit* नामककृतिमध्ये (Bombay : 1873, Preface to Third edition, p. xi in fifth edition 1881) : "Sanskrit Grammar has thus become a science at [Pāṇini's and other grammarians'] hands, and its study possesses an educational value of the same kind as that of Euclid ..."

टिप. 13 । दृश्यताम् Daniel H.H. Ingalls, "The Comparison of Indian and Western Philosophy," *Journal of Oriental Research* XXII (1954): p. 1-11.

टिप. 14 । दृश्यताम् Frits Staal, "Euclid and Pāṇini," *Philosophy East and West* 15 (1965): 99-116 = Frits Staal, *Universals*, Chicago: 1988: p. 143-160. तस्मिन् एव विषये Johannes Bronkhorst, "Pāṇini and Euclid: Reflections on Indian Geometry," *Journal of Indian Philosophy* 29: 43-80 (2001); Kim Plofker, *Mathematics in India* (Princeton 2009), p. 214-216.

टिप. 15 । दृश्यताम् Raffaele Torella, "Examples of the influence of Sanskrit grammar on Indian philosophy," *East and West* 37 (1987): p. 151-164.

टिप. 16 । एवं ह्याह कवी रुद्यर्द् किप्लिङ् (Rudyard Kipling), "The Ballad of East and West" नामककवितामध्ये (1889) "East is East and West is West, and never the twain shall meet." (प्राची हि प्राची पश्चिमा च पश्चिमा । संमेलनं ते जातु नैव गच्छतः इति) अस्यां कवितायां सत्यपि कदाचित् पश्चिमप्राच्यपुरुषव्यक्तिद्वयस्य पौरुषवैर्यसाम्ये तथापि सामान्येन पश्चिमप्राच्यलोकयोरत्यन्तदूरता प्रतिपादिता ।

टिप. 17 । कारिकाद्वयमिदं श्री वामनशास्त्री भागवत इति शास्त्रिभ्योऽत्यन्तं प्रियमभवत् तत्र च प्रथमकारिका तैरनेकवारमुपन्यस्ता ।